# मूल्यानि

## नूतनशीक्षानीतेः (NEP 2020) परिप्रेक्ष्ये मूल्यानां विमर्शः

**डॉ. संदीप वसन्त जोशी**
**वरिष्ठशोधाध्येता**
**संस्कृतसंवर्धनप्रतिष्ठानम्**
Sandeep.joshi993@gmail.com

### सारांशः

षट्त्रिंशद्वर्षेभ्यः अनन्तरं शिक्षानीतिः परिवर्तिता अस्ति। नूतनशिक्षानीतेः क्रियान्वयनं प्रारब्धम् अस्ति। मूल्यानां सन्दर्भे अस्यां नीतौ विहिता चर्चा न केवलं वर्तमानस्य भारतस्य समृद्ध्यर्थम् अपि तु भविष्यस्य भारतस्य निर्माणार्थम् अपि कृता अस्ति। समाजः शिक्षितस्य मनुष्यस्य मूल्याङ्कनं तेन अधिगतानां मूल्यानाम् आधारेण एव करोति। अतः शिक्षाप्रक्रिया साधनम् अस्ति चेत् तस्याः साध्यं मूल्यं भवति। अर्थात् मूल्याधिष्ठितस्य आदर्शव्यक्तित्वस्य निर्माणं शिक्षायाः साध्यं भवति।

### प्रस्तावना

मनुष्यस्य पर्यायेण समाजस्य सर्वाङ्गिणः विकासः भवेत् एतदर्थं समाजेन अङ्गीकृताः आदर्शाः विश्वासाः सङ्कल्पनाश्च *मूल्यानि* इति कथ्यन्ते। सत्यम्, अंहिसा, अस्तेयं, स्वतन्त्रता, शमः, दमः, परोपकारः, क्षमा, धैर्यं, करुणा, बन्धुता, समानता राष्ट्रप्रेम इत्यादीनि कानिचन मूल्यानि सन्ति। सांस्कृतिकमूल्यानि नैतिकमूल्यानि सामाजिकमूल्यानि संवैधानिकमूल्यानि इति एतेषां प्रकाराः वक्तुं शक्यन्ते। मनुष्यस्य जीवने मूल्यानां नितराम् आवश्यकता भवति। जगति विद्यमानानां सर्वेषाम् अपि प्राणिनाम् आहार-निद्रा-भय-मैथुनेषु स्वाभाविकरूपेण प्रवृत्तिः दृश्यते। परन्तु मनुष्यस्य अन्येभ्यः प्राणिभ्यः भेदः मूल्यानां कारणात् एव अस्ति। कस्यापि समाजस्य स्तरः तेन स्वीकृतानां मूल्यानाम् आधारेण एव निर्धारितः भवति। अतः आदर्शसमाजस्य कृते आदर्शमूल्यानां नितराम् आवश्यकता भवति।

भारतीयज्ञानपरम्परायां सदाचारस्य महिमा बहुधा वर्णितः। *'आचारहीनं न पुनन्ति वेदाः'* *'आचारः प्रभवो धर्मः'* 'सत्यं वद' 'धर्मं चर' इत्यादिभिः वाक्यैः प्रतिपादितस्य आचारस्य मूले मूल्यानि एव भवन्ति। वेदवाङ्मयात् आरभ्य काव्यं यावत् सर्वत्र मूल्यानाम् एव उपदेशः कृतः दृश्यते। काव्यप्रकाशे काव्यस्य प्रयोजनं कथयन् मम्मटः 'रामादिवत् वर्तितव्यं न रावणादिवत्' इत्यादिभिः वाक्यैः मूल्योपदेशः एव काव्यस्य प्रयोजनम् इति सूचयति। हितोपदेशः पञ्चतन्त्रं नीतिशतकम् इत्यादीन् ग्रन्थान् अवलोकयामः चेत् मूल्याधिष्ठितस्य समाजस्य निर्माणम् एव एतेषां ग्रन्थानाम् उद्देश्यम् अस्ति इति ज्ञायते।

शिक्षाविद्भिः कृताः शिक्षणस्य व्याख्याः पश्यामः चेत् अपि मूल्यानां महत्त्वम् अवगन्तुं शक्नुमः। यथा अरविन्दघोषः "मनोवृत्तीनां नियमनं नैतिकमूल्यानां संस्कारः इति एतैः शारीरिकं बौद्धिकं विकासं सम्पाद्य मनुष्यस्य निर्माणम् एव शिक्षणम्" इति प्रतिपादयति।[1] डॉ. राधाकृष्णनमहोदयः 'चारित्र्यनिर्माणं शिक्षा'[2] इति प्रतिपादयति। जॉनहर्बर्टमहोदयः "नैतिकतासम्पादनम् एव शिक्षणस्य ध्येयम्" इति प्रतिपादयति।[3]

---

[1] A complete development of both body and intellect accompanied by a right regulation of a psyche and moral nature will produce good men. – Aravind Ghosh

[2] The major task of education is the improvement of character. – Dr. Radhakrishnan

[3] The one and the whole work of education may be summed up in the concept of morality. –John Herbart

मनुष्ये एतेषां मूल्यानां संस्कारः औपचारिकरूपेण अनौपचारिकरूपेण च भवति । मूल्यानाम् अनौपचारिक-संस्कारस्य विभिन्नानि स्रोतांसि सन्ति । यथा परिवारः, समाजः, पाठ्येतराणि पुस्तकानि, कला, सङ्गीतम्, उत्सवः, विभिन्नाः प्रसङ्गाः चेत्यादयः । औपचारिकस्रोतस्सु विद्यालयः पाठ्यपुस्तकानि च अन्तर्भवन्ति । छात्रस्य सर्वाङ्गिणः विकासः एव शिक्षायाः उद्देश्यं भवति । समाजः शिक्षितस्य मनुष्यस्य मूल्याङ्कनं तेन अधिगतानां मूल्यानाम् आधारेण एव करोति । अतः शिक्षाप्रक्रिया साधनम् अस्ति चेत् तस्याः साध्यं मूल्यं भवति । अर्थात् मूल्याधिष्ठितस्य आदर्शव्यक्तित्वस्य निर्माणं शिक्षायाः साध्यं भवति ।

एतद् साध्यं सम्पादयितुं शिक्षानीतेः निर्माणं क्रियते । शिक्षायाः माध्यमेन आदर्शसमाजस्य निर्माणार्थं शिक्षानीतिः मार्गं निर्दिशति । नूतनशिक्षानीतौ विभिन्नानां मूल्यानां चर्चा कृता अस्ति । एतेषां मूल्यानां क्रियान्वयनार्थं विभिन्नाः उपायाः अपि बोधिताः सन्ति । भारतीयपरम्पराम् आधृत्य मूल्यविषयकं चिन्तनम् अस्याः नूतनशिक्षानीतेः वैशिष्ट्यम् अस्ति । यदा कश्चन देशः आत्मगौरवं विस्मरति तदा सः नाशं गच्छति । इयं शिक्षानीतिः मूल्यानां द्वारा पुनः आत्मगौरवं सम्पादयितुं भारतस्य समृद्धां परम्परां स्मारयितुं च कटिबद्धा अस्तीति दृश्यते ।

## प्राचीनशिक्षानीतौ मूल्यचर्चा

स्वातन्त्र्योत्तरभारते प्राधान्येन १९६८ १९८६ तमे वर्षे च शिक्षानीतेः प्रणयनं जातम् । १९४८ (विश्वविद्यालयशिक्षा-आयोगः), १९५२ (माध्यमिकशिक्षा-आयोगः), १९६४ (कोठारी-आयोगः) एते आयोगाः विभिन्नाः शिक्षासमितयः च निर्मिताः एतेषाम् आयोगानां नीतीनां च परामर्शः अपि शिक्षानीतौ सङ्कलिताः । १९६८ शिक्षानीतौ कोठारी-आयोगस्य प्रभावः अस्ति । अस्यां नीतौ विज्ञानतन्त्रज्ञानस्य सन्दर्भे व्यावसायिकशिक्षायाः सन्दर्भे अवधानं दत्तम् अस्ति । १९८६ शिक्षानीतौ प्राथमिकशिक्षायां व्यावसायिकशिक्षायां च अवधानं कृतम् अस्ति । मूल्यानां सन्दर्भे यदि एतयोः नीत्योः चर्चां कुर्मः तर्हि वयं द्रष्टुं शक्नुमः यत् उभयत्रापि मूल्यशिक्षणस्य विषये केचन अंशाः उपस्थापिताः सन्ति । भारतीयमूल्यानां प्रवाहिका संरक्षिका च संस्कृतभाषा अस्ति। अतः १९६८ तमस्य शिक्षानीतौ संस्कृतस्य विकासस्य चर्चा कृता अस्ति । १९८६ तमस्य शिक्षानीतौ भूमिकायां मूल्यानां ह्रासस्य विषये चिन्ता अपि प्रकटिता अस्ति । अत्रैव ३.२ परिच्छेदे 'वसुधैव कुटुम्बकम्' इत्यस्य उद्घोषः अपि दृश्यते । मूल्यशिक्षाप्रकरणे ८.४-८.७ परिच्छेदेषु विस्तरेण मूल्यानां ह्रासः मूल्यशिक्षायाः आवश्यकता च चर्चिता अस्ति । तथापि उभयोः नीत्योः परिणामान् अवलोकयामः चेत् मूल्यानां संस्कारपक्षः गौणः जातः इति दृश्यते । शिक्षायाः वर्तमानस्थितिं पश्यामः चेत् भारतीयमूल्यानां पुनस्स्थापनस्य अत्यन्तम् आवश्यकता अस्ति इति ज्ञायते ।

## नूतनशिक्षानीतौ मूल्यानि

प्रायः षट्त्रिंशद्वर्षेभ्यः अनन्तरं शिक्षानीतिः परिवर्तिता अस्ति । नूतनशिक्षानीतेः क्रियान्वयनं प्रारब्धम् अस्ति । मूल्यानां सन्दर्भे अस्यां नीतौ विहिता चर्चा न केवलं वर्तमानस्य भारतस्य समृद्ध्यर्थम् अपि तु भविष्यस्य भारतस्य निर्माणार्थम् अपि कृता अस्ति । प्राक्शिक्षानीतेः परिप्रेक्ष्ये समाजे महत् परिवर्तनं जातम् अस्ति । एकविंश्यां शताब्द्यां बहवः वैज्ञानिकशोधाः जाताः । एकस्य कार्यस्य कृते यत्र शताधिकानां जनानाम् आवश्यकता आसीत् तत्र तस्य कार्यस्य सिद्धिः एकेन यन्त्रेण शक्या जाता । मनुष्यजीवनस्य सर्वोऽपि अंशः यन्त्रस्पृष्टः जातः । न केवलं यन्त्रस्पृष्टः अपि तु यन्त्रनिर्भरः जातः । यस्य सहवासे मनुष्यः भवति तस्य गुणधर्मादीन् अपि सः अङ्गीकरोतीति दृश्यते । अतः यन्त्राणाम् एव साहचर्यात् मनोभावानां संवेदनानां मूल्यानां ह्रासः जायमानः अस्ति वा इत्यपि शङ्का जायते । भारतीयपरम्परया धृतिः क्षमा दया सत्यं चेत्यादीनि मूल्यानि मानवजीवनस्य लक्ष्यत्वेन परिकल्पितानि सन्ति । एषा शिक्षानीतिः

प्रतिपदम् एतेषां मूल्यानां महत्त्वं प्रतिपादयति । यत्र प्राक्शिक्षानीतौ मूल्यशिक्षा अङ्गत्वेन कल्पिता दृश्यते तत्र अस्यां शिक्षानीतौ मूल्यानि शिक्षायाः आधारत्वेन उपस्थापितानि दृश्यन्ते ।

अस्याः शिक्षानीतेः प्रस्तावना एव मूल्यचर्चया आरभ्यते । शिक्षायाः आवश्यकतां प्रतिपादयितुम् अत्र सामाजिकन्यायः समानता एकता चेत्यादीनां मूल्यानां कुञ्चिकात्वेन शिक्षा कल्पिता अस्ति ।

- *शिक्षा पूर्ण मानव क्षमता को प्राप्त करने, एक न्यायसंगत और न्यायपूर्ण समाज के विकास और राष्ट्रीय विकास को बढ़ावा देने के लिए मूलभूत आवश्यकता है । गुणवत्तापूर्ण शिक्षा तक सार्वभौमिक पहुँच प्रदान करना वैश्विक मंच पर सामाजिक न्याय और समानता, वैज्ञानिक उन्नति, राष्ट्रीय एकीकरण और सांस्कृतिक संरक्षण के संदर्भ में भारत की सतत प्रगति और आर्थिक विकास की कुंजी है ।*[4]

एकविंशतिशताब्द्यां शिक्षायाः लक्ष्यस्य प्राप्त्यर्थं शिक्षायाः विभिन्नानां पक्षाणां पुनर्व्यवस्थापनस्य प्रस्तावः शिक्षानीतौ उपस्थापितः अस्ति । एतस्य पुनर्व्यवस्थापनस्य कृते भारतीयपरम्परां मूल्यानि च आधारत्वेन कल्पयति एषा शिक्षानीतिः ।

- यह नीति भारत की परंपरा और सांस्कृतिक मूल्यों के आधार को बनाए रखते हुए, 21 वीं सदी की शिक्षा के लिए आकांक्षित लक्ष्यों, जिनमें एसडीजी 4 सम्मिलित हैं, के संयोजन में शिक्षा व्यवस्था, उसके नियमन और प्रशासन सहित, सभी पक्षों के
- सुधार और पुनर्गठन का प्रस्ताव रखती है । राष्ट्रीय शिक्षा नीति प्रत्येक व्यक्ति में निहित रचनात्मक क्षमताओं के विकास पर विशेष बल देती है ।[5]

ज्ञानं प्रज्ञा सत्यं चेति भारतीयदर्शनानां लक्ष्यणि सन्ति, ताम् एव भारतीयज्ञानपरम्पराम् अनुसरन्ती अस्ति एषा शिक्षानीतिः ।

- यह नीति प्राचीन और सनातन भारतीय ज्ञान और विचार की समृद्ध परंपरा के आलोक में तैयार की गयी है । ज्ञान, प्रज्ञा और सत्य की खोज को भारतीय विचार परंपरा और दर्शन में सदा सर्वोच्च मानवीय लक्ष्य माना गया है ।[6]

नूतनशिक्षानीतौ शिक्षानीतेः केचन आधारभूताः सिद्धान्ताः प्रतिपादिताः सन्ति तत्र अपि प्रामुख्येण मूल्यानां चर्चा विहिता अस्ति । वैज्ञानिक-चिन्तनशीलानां रचनात्मक-चिन्तनशीलानां जनानां निर्माणस्य उद्देश्यम् आवहन्ती एषा शिक्षानीतिः तादृशजनानां निर्माणं करुणा सहानुभूतिः चेत्यादीनां मूल्यानाम् आधारेण एव इच्छति ।

- शैक्षिक प्रणाली का उद्देश्य ऐसे अच्छे इंसानों का विकास करना है जो तर्कसंगत विचार और कार्य करने में सक्षम हों, जिनमें करुणा और सहानुभूति, साहस और लचीलापन, वैज्ञानिक चिंतन और रचनात्मक कल्पनाशक्ति, नैतिक मूल्य और आधार हों । इसका उद्देश्य ऐसे रचनाशील लोगों को तैयार करना है जो भारतीय संविधान द्वारा परिकल्पित 'समावेशी और बहुलतावादी' समाज के निर्माण में उत्कृष्ट पद्धति से योगदान कर सकें ।

बहुलतावादः समानता शिष्टाचारः स्वच्छता चेत्यादीनां मूल्यानां विकासस्य उद्देश्यम् अस्यां शिक्षानीतौ प्रकटितम् अस्ति ।

---

[4] NEP2020 प्रस्तावना

[5] NEP2020 प्रस्तावना

[6] NEP2020 प्रस्तावना

- सहानुभूति, दूसरों के लिए सम्मान, स्वच्छता, शिष्टाचार, लोकतांत्रिक भावना, सेवा की भावना, सार्वजानिक संपत्ति के लिए सम्मान वैज्ञानिक चिंतन, स्वतंत्रता, उत्तरदायित्व, बहुलतावाद, समानता और न्याय जैसे नैतिकता, मानवीय और संवैधानिक मूल्यों का विकास करना।

शिक्षानीतेः लक्ष्यस्य प्रतिपादने अपि मूल्यानां चर्चा कृता अस्ति। शिक्षा यदि छात्राणां मनसि स्वदेशविषये प्रीतिम् अभिमानं न जनयति चेत् सा निरर्थकी एव स्यात्। एषा शिक्षानीतिः न केवलं छात्राणां विचारे अपि तु आचारे अपि देशाभिमानम् इच्छति। मूल्येषु अपि देशाभिमानं धरन्तः एते छात्राः विश्वकल्याणार्थं प्रतिबद्धाः भूत्वा वैश्विकनागरिकाः भवेयुः इति। एषा एव भारतस्य वसुधैव कुटुम्बकस्य सङ्कल्पना अस्ति।

- नीति का विजन छात्रों में भारतीय होने का गर्व न केवल विचार में अपितु व्यवहार, बुद्धि और कार्यों में भी और साथ ही ज्ञान, कौशल, मूल्यों और सोच में भी होना चाहिए जो मानवाधिकारों, स्थायी विकास और जीवनयापन तथा वैश्विक कल्याण के लिए प्रतिबद्ध हो, ताकि वे सही मायने में वैश्विक नागरिक बन सकें।

प्रथमाध्याये १.२ परिच्छेदे आधारभूतशिक्षायाः (ईसीसीई) सन्दर्भे विभिन्नगतिविधीनां कार्याणां च चर्चा कृता अस्ति एतेषां कार्याणाम् उद्देश्ये अपि मूल्यानां चर्चा अत्र कृता। एतस्य एव सन्दर्भः ४.२ मध्ये अपि उक्तः।

- अन्य कार्य जैसे सामाजिक कार्य, मानवीय संवेदना, अच्छे व्यवहार, शिष्टाचार, नैतिकता, व्यक्तिगत और सार्वजनिक स्वच्छता, समूह में कार्य करना और आपसी सहयोग को विकसित करने पर भी ध्यान केंद्रित किया गया है।

मूल्यानां शिक्षणार्थं क्रीडाविधिः अपि उपयुक्तः भवति। ४.८ परिच्छेदे बालानां संज्ञानात्मकविकासार्थं स्वानुशासनं समूहभावना उत्तरदायित्वं नागरिकता इति एतेषां विकासार्थं क्रीडासमन्वयात्मकानां गतिविधीनां चर्चा कृता अस्ति।

- खेल-समन्वय एक और 'क्रॉस-करिकुलर' शैक्षणिक दृष्टिकोण है जिसके अन्तर्गत स्थानीय खेलों सहित विविध शारीरिक गतिविधियों का शिक्षण प्रक्रियाओं में उपयोग किया जाता है, ताकि परस्पर सहयोग, स्वत: पहल करना, स्वयं निर्देशित होकर कार्य करना, स्व-अनुशासन, समूह भावना, उत्तरदायित्व, नागरिकता, आदि जैसे कौशल विकसित करने में सहायता हो सके।

छात्रस्य समग्रव्यक्तित्वस्य विकासार्थं तेन प्रामुख्येण अधिगन्तव्यानां केषाञ्चन विषयाणां चर्चा ४.२३ परिच्छेदे कृता अस्ति। अस्यां चर्चायां मूल्यसम्बद्धानां विषयाणाम् अपि चर्चा कृता अस्ति । यथा नैतिकता नैतिकतर्कः च, मानवमूल्यानां संवैधानिकमूल्यानां च ज्ञानम् अभ्यासः च, संवेदनशीलता, मौलिककर्तव्यानि चेत्यादयः विषयाः छात्रेण अवश्यम् अध्येतव्याः।

- सभी विद्यार्थियों को एक अच्छे, सफल, अभिनव, अनुकूलनीय और उत्पादक व्यक्ति बनने के लिए कुछ विषयों, कौशलों और क्षमताओं को सीखना भी आवश्यक है। ................नैतिकता और नैतिक तर्क, मानव और संवैधानिक मूल्यों का ज्ञान और अभ्यास; लिंग संवेदनशीलता; मौलिक कर्तव्य; नागरिकता कौशल और मूल्य; भारत का ज्ञान; पर्यावरण संबंधी जागरूकता, जिसमें पानी और संसाधन संरक्षण, स्वच्छता और साफ-सफाई सम्मिलित हैं; और समसामायिक मामलों और स्थानीय समुदायों, राज्यों, देश और संसार द्वारा जिन महत्त्वपूर्ण मुद्दों का सामना किया जा रहा है उनका ज्ञान।

बाल्यात् एव छात्रेषु नैतिकतावर्धनार्थं करणीयानां कार्याणां विषये ४.२८ मध्ये चर्चा कृता अस्ति। अत्र बहूनां मूल्यानां न केवलं चर्चा विहिता अपि तु तदर्थम् आवश्यकानां पञ्चतन्त्रं हितोपदेशः जातकमालादिग्रन्थानां भारतीयसंविधानस्य च विषये अपि उल्लेखः कृतः।

- नैतिक बोध के चलते पारंपरिक भारतीय मूल्यों और सभी आधारभूत मानवीय और संवैधानिक मूल्यों (जैसे सेवा, अहिंसा, स्वच्छता, सत्य, निष्काम-कर्म, शांति, त्याग, सहिष्णुता, विविधता, बहुलवाद, नैतिक-आचरण, लैंगिक संवेदनशीलता, बुजुर्गों के लिए सम्मान, सभी लोगों और उनकी अंतर्निहित क्षमताओं का सम्मान, पर्यावरण के प्रति सम्मान, सहायता करना, शिष्टाचार, धैर्य, क्षमा, समानुभूति, करुणा, देशभक्ति, लोकतांत्रिक दृष्टिकोण, अखंडता, उत्तरदायित्व, न्याय, स्वतंत्रता, समानता और बंधुत्व) को विद्यार्थियों में विकसित किया जा सकेगा। बच्चों को पंचतंत्र की मूल कहानियों, जातक, हितोपदेश, और अन्य रुचिकर दंतकथाओं और भारतीय परंपरा से प्रेरक कहानियों को पढ़ने और सीखने का अवसर मिलेगा और वैश्विक साहित्य पर उनके प्रभावों के बारे में भी वे जानेंगे।

  षष्ठे अध्याये समतामूलकशिक्षायाः सन्दर्भे ६.२० परिच्छेदे पाठ्यक्रमस्य विषये चर्चा विहिता अस्ति। विद्यालयीयपाठ्यक्रमे के विषयाः भवेयु इत्यस्य मार्गदर्शने अत्र मूल्यानां चर्चा कृता अस्ति।

- विद्यालयी पाठ्यक्रम में प्रारंभिक शिक्षा, मानवीय मूल्यों पर सामग्री, जैसे सभी व्यक्तियों के लिए सम्मान, सहानुभूति, सहिष्णुता, मानव अधिकार, लैंगिक समानता, अहिंसा, वैश्विक नागरिकता, समावेशन और समता सम्मिलित होंगे ।

  नवमाध्याये ९.१.२ परिच्छेदे उच्चतरशिक्षायाः उद्धेश्यं प्रतिपादयितुम् एकविंशतिशताब्द्याः आवश्यकतारूपेण कासाञ्चन क्षमतानां वर्धनस्य आवश्यकता प्रतिपादिता अस्ति। अत्रापि मूल्यानां चर्चा कृता दृश्यते।

- व्यक्तियों के समग्र विकास के उद्देश्य के लिए यह आवश्यक है कि पूर्व-विद्यालय से उच्चतर शिक्षा तक, सीखने के प्रत्येक चरण में कौशल और मूल्यों का एक निर्धारित समुच्चय सम्मिलित किया जाएगा।

  एकादशाध्याये ११.८ परिच्छेदे सर्वसमावेशिकशिक्षायाः सन्दर्भे मूल्याधारिता शिक्षा प्रतिपादिता अस्ति।

- मूल्य आधारित शिक्षा में निम्नलिखित सम्मिलित हैं: मानवीय, नैतिक, संवैधानिक तथा सार्वभौमिक मानवीय मूल्य जैसे सत्य, नेक आचरण (dharma), शांति, प्रेम, अहिंसा, वैज्ञानिक दृष्टिकोण, नागरिक मूल्य और जीवन- कौशल; सेवा तथा सामुदायिक कार्यक्रमों में सहभागिता समग्र शिक्षा का अभिन्न अंग होगा।

शिक्षकस्य आचारविचारस्य प्रभावः छात्रेषु निश्चयेन भवति इति अनुभवसिद्धम्। अतः छात्राणां मूल्यपाठनस्य सन्दर्भे शिक्षकस्य आचरणे अपि मूल्यानां प्रतिबिम्बं दृश्येत। एतद् एव डॉ.एच. एस. बैसवर्यः प्रतिपादयति "मूल्यों की शिक्षा सिखा कर नहीं बल्कि उन मूल्यों को अनुभूत कराकर, मूल्यों को जी कर आस्था, विश्वास और मान्यता में बदला जा सकता है" ।[7] अतः शिक्षानीतौ पञ्चादशाध्याये अध्यापकशिक्षायाः सन्दर्भे अध्यापकानां कृते अपि मूल्यशिक्षायाः आवश्यकता प्रतिपादिता अस्ति।

- शिक्षकों को तैयार करना एक ऐसी प्रक्रिया है जिसके लिए बहु-विषयक दृष्टिकोण और ज्ञान की आवश्यकता के साथ ही साथ, श्रेष्ठ मेंटरों के निर्देशन में मान्यताओं और मूल्यों के निर्माण के साथ ही साथ उनके अभ्यास की भी आवश्यकता होती है। यह सुनिश्चित किया जाना चाहिए कि अध्यापक शिक्षा और शिक्षण प्रक्रियाओं से संबंधित अद्यतन प्रगति के साथ ही साथ भारतीय मूल्यों, भाषाओं, ज्ञान, लोकाचार, और परंपराओं जनजातीय परंपराओं सहित के प्रति भी जागरूक रहें।

एतदतिरिच्य बहूनि स्थानानि सन्ति यत्र मूल्यानां विषये अप्रत्यक्षरूपेण चर्चा विहिता अस्ति। यथा ४.१५,१६ मध्ये राष्ट्रिय-एकत्वम् इत्यस्य सम्पादनार्थं 'भारतीयभाषाः' इति योजनायाः विचाराः उपस्थापिताः सन्ति ।

[7] मूल्य विमर्श, काशी हिन्दु विश्वविद्यालयः, पृ. ३६

- भारत की भाषाएं संसार में सबसे समृद्ध, सबसे वैज्ञानिक, सबसे सुंदर और सबसे अधिक अभिव्यंजक भाषा में से हैं, जिनमें प्राचीन और आधुनिक साहित्य (गद्य और कविता दोनों) के विशाल भंडार हैं। इन भाषा में लिखी गयी फिल्म, संगीत और साहित्य भारत की राष्ट्रीय पहचान और धरोहर हैं। सांस्कृतिक और राष्ट्रीय एकीकरण की दृष्टि से सभी युवा भारतीयों को अपने देश की भाषाओं के विशाल और समृद्ध भण्डार और इनके साहित्य के खज़ाने के बारे में जागरूक होना चाहिए।

एवम् अस्यां शिक्षानीतौ प्रामुख्येण सत्यम्, अहिंसा, ज्ञानम्, धैर्यम्, क्षमा, करुणा, निष्कामकर्म, शान्तिः, प्रेम, त्यागः, सहिष्णुता, सहानुभूतिः, सामाजिकन्यायः, समानता, राष्ट्रिय-एकता, सम्मानः, स्वच्छता, शिष्टाचारः, सेवा, स्वतन्त्रता, उत्तरदायित्वम्, बहुलतावादः, सहायता, ज्येष्ठानां समादरः, पर्यावरणस्य आदरः, देशभक्तिः अखण्डता च इति एतेषां मूल्यानां चिन्तनं कृतम् अस्ति । भारतीयज्ञानपरम्परा सर्वदा एतानि मूल्यानि उद्घोषयन्ती उद्बोधयन्ती च अस्ति। मूल्यानां संस्कारार्थं बाल्यकालः महत्त्वपूर्णः भवति । अतः विभिन्नगतिविधिभ्यः बालानां कृते मूल्यानां पाठनस्य आवश्यकता अत्र प्रतिपादिता । तथैव युवकानां कृते अपि व्यावसायिकशिक्षायाः अर्जनस्य सन्दर्भे सर्वसमावेशिकशिक्षायां मूल्यानाम् अपि अन्तर्भावः कृतः । अध्यापकानां कृते अपि मूल्यशिक्षणस्य आवश्यकता उक्ता। एवम् एषा शिक्षानीतिः आबालवृद्धं सर्वस्मिन् स्तरे मूल्यानाम् अध्ययनाध्यापनस्य प्रेरणं करोति। भारते प्रतिभावतां श्रमशीलानां च न्यूनता नास्ति। परम् एषा प्रतिभा श्रमः च विधायके कर्मणि न्यायमार्गेण योज्यते चेत् भारतं विश्वगुरुं कर्तुं न कोऽपि क्लेशः भविष्यति। मूल्यानां क्रियान्वयनस्य पक्षे यदि अधिकम् अवधानं क्रियते चेत् एतया मूल्याधारितशिक्षया यत् भारतं निर्मितं भविष्यति तत् निश्चयेन अतुल्यभारतम्! स्यात्।

## सन्दर्भग्रन्थाः


1. शिक्षानीतिः १९६८
2. शिक्षानीतिः १९८६ (१९९२)
3. शिक्षानीतिः २०२०
4. मूल्यविमर्श, काशी हिन्दु विश्वविद्यालयः, २००९